# || श्री स्वामी सामर्थ ||

---

## || श्री ब्रह्मकवचम् ||

---

ॐ श्रीब्रह्मणे नमः ॥
कवचं शृणु चार्वङ्गि जगन्मङ्गलनामकम् ॥
पठनाद्धारणाद्यस्य ब्रह्मज्ञो जायते ध्रुवम् ॥ १॥

परमात्मा शिरः पातु हृदयं परमेश्वरः ॥
कण्ठं पातु जगत्त्राता वदनं सर्वदृग्विभुः ॥ २॥

करौ मे पातु विश्वात्मा पादौ रक्षतु चिन्मयः ॥
सर्वाङ्गं सर्वदा पातु परब्रह्म सनातनम् ॥ ३॥

श्रीजगन्मङ्गलस्यास्य कवचस्य सदाशिवः ॥
ऋषिश्छन्दोऽनुष्टुबिति परब्रह्म च देवता ॥ ४॥

चतुर्वर्गफलावाप्त्यै विनियोगः प्रकीर्तितः ॥
यः पठेद्ब्रह्मकवचं ऋषिन्यासपुरःसरम् ॥ ५॥

स ब्रह्मज्ञानमासाद्य साक्षाद्ब्रह्ममयो भवेत् ॥
भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारायेद्यदि ॥ ६॥

कण्ठे वा दक्षिणे बाहौ सर्वसिद्धीश्वरो भवेत् ॥
इत्येतत् परमं ब्रह्मकवचं ते प्रकाशितम् ॥ ७॥

दद्यात् प्रियाय शिष्याय गुरुभक्ताय धीमते ॥

पठित्वा स्तोत्रकवचं प्रणमेत्साधकाग्रणीः ॥ ८॥

ॐ नमस्ते परमं ब्रह्म नमस्ते परमात्मने ॥
निर्गुणाय नमस्तुभ्यं सद्रूपाय नमो नमः ॥ ९॥

ॐ श्रीब्रह्मणे नमः ॥
ॐ श्रीब्रह्मणे नमः ॥
ॐ श्रीब्रह्मणे नमः ॥

॥ इति श्रीब्रह्मकवचं सम्पूर्णम् ॥

॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थार्पर्ण मस्तु||